प्रदायगुप्तनरगुप्तसमस्तप्रकटयोगिनीसृष्टिचक्रदेवताभ्यो।
।३ समस्तप्रकटगुप्तगुप्ततरसंप्रदायपरापररहस्यातिरहस्य
निगर्भकुलोत्तीर्णयोगिनीस्थितिचक्रदेवताभ्यो।३ अतिरह
स्यपरापररहस्यकुलकौलनिगर्भसंप्रदायगुप्तगुप्ततरसमस्त
प्रकटयोगिनीसमष्टिचक्रदेवताभ्यो।३ सृष्टिस्थितिसंहार
कृत्येच्छाज्ञानक्रियाप्रमुखसर्वशक्तिमंडलमंडितत्रैलोक्यमो
हनसर्वाशापरिपूरकसर्वसंक्षोभणसर्वसौभाग्यदायकस
र्वार्थसाधकसर्वरक्षाकरसर्वरोगहरसर्वसिद्धिप्रदसर्वा
नंदमयाख्यनवचक्राधीश्वरीत्रिपुरेत्रिपुरेशीत्रिपुरसुंदरि

त्रिपुरवासिनित्रिपुराश्रीत्रिपुरमालिनित्रिपुरासिद्धेत्रिपुरां
बमहात्रिपुरसुंदरिमहा२माहेश्वरिमहा२राज्ञिमहा२शक्ते
महा२गुप्तेमहा२ज्ञप्तेमहा२नंदेमहा२स्पंदेमहा२शयेमहा२
श्रीचक्रनगरसाम्राज्ञिनमस्ते२स्वाहा श्रीं ह्रीं ऐं मिति पंच
पुष्पांजलीन्दत्वा। ततः। तद्दिव्यपदपद्मयुगलकवलीकृ
तनिःशेषयामस्वरूपिणीश्रीमहात्रिपुरसुंदरीपराभट्टा
रिकांबायैनमः इति नमस्कारपुष्पांजलिं दत्वा कल्पसूत्रो
क्तमंदिरपूजां कुर्यात्तद्यथा।३ अमृताम्भोनिधये।३ रत्नद्वी
पाय।३ नानावृक्षमहोद्यानाय।३ कल्पवृक्षवनवाटिकायै।
।३ संतानवनवाटि।३ हरिचंदनवनवाटि।३ मंदारवाटिका

ये॰।३ कदंबवनवाटि॰।३ पारिजातवनवाटि॰।३ बिल्ववनवाटि॰।३
पुष्परागरत्नप्राकाराय॰।३ पद्मरागरत्नप्रा॰।३ गोमेदरत्नप्रा॰।३
वज्ररत्नप्रा॰।३ वैडुर्यरत्नप्रा॰।३ इंद्रनीलरत्नप्रा॰।३ मौक्तिकरत्न
प्रा॰।३ मरकतरत्नप्रा॰।३ विद्रुमरत्नप्रा॰।३ माणिक्यरत्नप्रा॰।३ना
नारत्नसहस्रस्तंभमंडपाय॰।३ अमृतवापिकायै॰।३ आनंदवापिका
यै॰।३ विमर्शवापिकायै॰।३ बालातपोद्गाराय॰।३ चंद्रिकोद्गाराय॰
।३ महाशृंगारपरिखायै॰।३ महापद्माटव्यै॰।३ चिंतामणिगृहराजाय॰
।३ पूर्वाम्नायमयपूर्वद्वाराय॰।३ दक्षिणाम्नायमयदक्षिणद्वारा॰।३
पश्चिमाम्नायमयपश्चिमद्वाराय॰।३ उत्तराम्नायमयोत्तरद्वाराय॰।३
२८ कृ॥ ऊर्ध्वाम्नायमयोर्ध्वद्वाराय॰।३ रत्नप्रदीपवलयाय॰।३ महासिंहासना मणिमय
य॰।३ ब्रह्ममयैकमंचपादाय॰।३ विष्णुमयैकमंचपादाय॰।३ रुद्रमयै ॥८२॥

कमंचपादाय॰।३ ईश्वरमयैकमंचपादा॰।३ सदाशिवमयमंचफ
सप्ता लकाय॰।३ हंसतूलतल्लिमायै॰।३ हंसतूलमहोपधानायै॰।३ कौसुं
भास्तरणाय॰।३ महावितानाय॰।३ महाजवनिकायै॰।३ ततः काला माया
ग्निरुद्राय स्वकं पूजयेत्।३ कालाग्निरुद्राय॰।३ मं मंडूकाय॰।३ आं आ
धारशक्त्यै॰।३ अं अनंताय॰।३ कूं कूर्माय॰।३ वां वराहाय॰।३ दिं दिग्ग
जेभ्यो॰।३ पृं पृथ्व्यै॰। पूर्वादिषु दिक्षु ऊर्ध्वमथश्चेंद्रादिकान्पूजयेत्।
३ लं इंद्राय पृथिव्याधिपतये ऐरावतवाहनाय वज्रहस्ताय त्रिपुर
सुंदरीसपरिवाराय॰।३ रं अग्नये तेजोधिपतये मेषवाहनाय व्यज
नहस्ताय त्रिपु॰।३ हं यमाय प्रेताधिपतये महिषवाहनाय दंडहस्ता
य त्रिपुर॰।३ षं निर्ऋतये रक्षोधिपतये नरवाहनाय खड्गहस्ताय त्रि॰
।३ वं वरुणाय जलाधिपतये मकरवाहनाय पाशहस्ताय त्रिपुर॰

।३ यं वायवे गंधर्वाधिपतये मृगवाहनाय ध्वजहस्ताय त्रिपु॰।३ सं कुबे
राय यक्षाधिपतये अश्ववाहनाय गदांकुशहस्ताय त्रिपु॰।३ शं ईशा
नाय प्रमथाधिपतये वृषभवाहनाय त्रिशूलहस्ताय त्रिपु॰।३ ॐ ब्रह्मणे
सत्यलोकाधिपतये हंसवाहनाय कमंडलुहस्ताय त्रि॰।३ ह्रीं विष्णवे पा
ताललोकाधिपतये गरुडवाहनाय चक्रहस्ताय त्रि॰।३ ततश्च ३ रक्तद्वा
दशशक्तियुक्ताय दीपनाथाय॰ इति दीपनाथं संपूज्य।३ जंबुद्वीपना
थायै॰ हुफट् इति पूजास्थाने पुष्पांजलिं दत्वा। तत्र श्रीचक्रं संस्थाप्य
द्वारपूजां कुर्याद्यथा।३ पूर्वद्वारे द्वारश्रियै॰।३ सरस्वत्यै॰।३ महालक्ष्म्यै॰।
३ गौर्यै॰।३ मायायै॰।३ दुर्गायै॰।३ दक्षिणद्वारे द्वारश्रियै॰।३ भद्रकाल्यै॰
।३ स्वस्त्यै॰।३ स्वाहायै॰।३ शुभंकरायै॰।३ गौर्यै॰।३ लोकधात्र्यै॰।३ वागी
श्वर्यै॰। पश्चिमद्वारे ३ द्वारश्रियै॰।३ पृथ्व्यै॰।३ अमृतार्णवाय॰।३ काल्ला

ग्निरुद्राय॰।३ आधारशक्त्यै॰।३ ऐश्वर्याय॰। उत्तरद्वारे ३ द्वारश्रियै॰
।३ अनैश्वर्याय॰। वैराग्याय॰।३ अवैराग्याय॰। पूर्वादिदिक्षु ३ धर्माय॰
।३ अधर्माय॰।३ ज्ञानाय॰।३ अज्ञानाय॰।३ ऐं अग्निमंडलाय॰।३ क्लीं
सूर्यमंडलाय॰।३ सौः सोममंडलाय॰। ऐं ब्रह्ममंडलाय॰।३ मध्ये
क्लीं विष्णुमंडलाय॰।३ सौः रुद्रमंडलाय॰।३ आत्मने॰।३ अंतरात्मने॰।
३ परमात्मने॰।३ इति पुष्पाक्षतैः संपूज्य ध्यायेत्। ध्यायेन्निरामयं
वस्तु जगत्त्रयविमोहिनीं। अशेषव्यवहाराणां स्वामिनीं संविदं परां।
उद्यत्सूर्यसहस्राभां दाडिमीकुसुमप्रभां। जपाकुसुमसंकाशां प
द्मरागमणिप्रभां। रविबंधुंजनिभां तप्तकांचनाभां सुरेश्वरीं। र
क्तोत्पलदलाराग पादपल्लवराजितां।३ अनर्घ्यरत्न खचितमं
जीरचरणद्वयां। पादांगुलीयक क्षिप्त रत्नतेजो विराजितां। ३ कद

रत्न

लीलाखितास्तंभस्रकुमारोरुकोमलां। नितंबबिंबसद्रक्तनर्घ्य बिल
वस्त्रपरिष्कृतां।५। मेखलाबद्धमाणिक्यकिंकिणीनादविभ्र
मां। अलक्ष्यमध्यमां निम्ननाभिं शांतोदरीं परां।६। रोमराजि
लसद्भूतमहाकुचफलान्वितां। स्फुरत्तनिबिडोत्तुंगस्तनमंडलरा
जितां।७। अनर्घ्यमौक्तिकस्फारहारभारविराजितां। नवरत्नप्र
भारक्तग्रैवेयवरभूषणां।८। श्रुतिभूषांमनोरम्यांकपोलस्थल
मंडलां। उद्यदादित्यसंकाशांताटंकसमुखप्रभां।९। पूर्णचंद्रमु
खींपद्मवदनांवरनासिकां। स्फुरन्मदनकोदंडस्फभ्रुवांपद्मलो
चनां।१०। ललाटपट्टसंराजद्रत्नाढ्यतिलकांचितां। मुक्तामाणि
क्यघटितमुकुटस्थलकिंकिणी।११। स्फुरच्चंद्रकलाराजन्मु
कुटांलोचनत्रयां। प्रवालवल्लिविलसद्बाहुवल्लिचतुष्टयां।१२। ११८४१८

इक्षुकोदंडपुष्पेषुपाशांकुशचतुर्भुजां। सर्वदेवमयीमंबां
सर्वसौभाग्यसुंदरीं।१३। सर्वतीर्थमयींविद्यांसर्वकामप्र
पूरिणीं। सर्वशास्त्रमयींविद्यांसर्वागमनमस्कृतां।१४। स
र्वाम्नायमयींविद्यांसर्वदेवप्रशोभितां। सर्वानंदमयींज्ञा
नगह्वरांसिद्धिदांपरां।१५। एवंध्यात्वापरामंबांवहन्नासा
पुटक्रमात्। त्रिखंडमुद्रयाविंदोमहापद्ममनुस्मरन्।१६।
आवाह्यदेवेशिमनुंपठन्पीठस्थितांस्मरेत्।३। ह्रैं ह्क्लीं
ह्सौः महापद्मवनान्तस्थे कारणानंदविग्रहे। सर्वभूतहिते
मातरेह्येहिपरमेश्वरि। देवेशिभक्तिसुलभे सर्वावरणसंयु १ आग च्छ
ते। यावत्त्वांपूजयिष्यामितावत्त्वंसुस्थिराभव।३। मूलं श्रीभ ग च्छ
गवतिआगच्छागच्छास्मिन्मंडलेसान्निध्यंकुरुस्वाहा। इ

तित्रिखंडामुद्रां बध्वा। ब्रह्मरंध्रांतस्थांतडित्कोटिविडंबिनीं
सर्वावरणसंछन्नां सपरिवारां श्रीचक्रमध्यगतां वामनासापु
टमार्गविनिर्गतां देवीं बिंदावावाह्य चिंतयेत्तत्र बिंदुमध्ये निवा
सिनीं। आवाहनस्थापन। संभिधापन। सन्निरोधन। अवगुंठ
न। संमुखीकरणपरमीकरणप्रार्थना धेनुयोनिमुद्राः प्रदर्शये
त्। प्राणप्रतिष्ठां कृत्वा पंचोपचारैः पूज्ययोनिं प्रदर्श्य। मूलेन
सकलीकरणं यजेत्। सकुंकुमविलेपनामिति ध्यात्वा। देवीं ध्या
त्वा किरीटादिमुद्राः प्रदर्श्य विधिया। दीपिनीमालिनीभ्यां च वि
शेषार्घ्यामृतेन तु। संतर्प्य त्रीन्प्रतिमनुं गंधपुष्पाक्षतैर्यजेत्।
पाद्यार्घ्यमाचमनीयमधुपर्कस्नानप्रोक्षणी पात्राणि प्रक्षा
ल्यतन्मूले त्रिकोणमंडलानि विरच्य आधारोपरि पात्राणि स्था

प्य पाद्यपात्रे श्यामाक दूर्वाब्ज विष्णुक्रांताः निक्षिप्य गंधा
क्षतपुष्पैः पूज्य मूलं जपेत्। अर्घ्यपात्रे गंधाक्षतपुष्पा यवकु
शाग्रतिलसर्षपाः दूर्वाश्चेति। आचमनीये जातीफललवंग
कंकोलानि। मधुपर्कपात्रे दधिमधुघृतं। पुनराचमनीये शु
द्धं जलं। स्नानप्रोक्षणीये गंधपुष्पाक्षतांश्च निक्षिप्य मूलमं
त्रं जपेत्। चतुःषष्ट्युपचारान् आचरेद्यथा। ३ मूलेन प्रोक्षणीजले
न देवीं त्रिः प्रोक्ष्य ३ सर्व श्रीदेव्यै पाद्यं कल्पयामि नम इति पा
द्यपात्रस्थजलेन। ३ सर्व श्रीदेव्यै अर्घ्यं अर्घ्यपात्रस्थजलेन
आचमनीयपात्रस्थजलेनाचमनीयं। मधुपर्कपात्रस्थेन म
धुपर्कं। पुनराचमनीयशुद्धजलेन। सुगंधितैलाभ्यंगं। मज्ज
नशालाप्रवेशनं। मज्जनशालायां मरकतमणिपीठोपवेश

नं।इमावुपचारोअक्षतैः।दिव्यस्नानीयं स्नानपात्रजलेन
उद्वर्तनं।उष्णोदकस्नानं।कनककलशच्युतसकलतीर्था
भिषेकं कर्पूरादिसुवासितजलेनशंखोदकेनवा।अथाक्षतै
रुपचारानाचरेत्।धौतवस्त्रपरिमार्जनं।अरुणदुकूलपरिधा
नं।अरुणकुचोत्तरीयं।आलेपमंडपप्रवेशनं।आलेपमंडपम
णिपीठोपवेशनं।चंदनागुरुकुंकुममृगमदकस्तूरीगोरोच
नादिसर्वांगविलेपनं।केशभरस्यकालागुरुधूपनं।मल्लिका
मालतीजातीचंपकाशोकशतपत्रपूगपुंनागकुरुवककु
ल्हारमुख्यसर्वर्तुकुसुममालाः।भूषणमंडपप्रवेशनं।भूष
णमंडपमणिपीठोपवेशनं।नवमणिमयमुकुटं।चंद्रशकलं
सीमंतसिंदूरं।रत्नतिलकं।कालांजनं।पालीयुगलं।मणि ॥५६॥

कुंडलयुगलं।नासाभरणं।अधरयावकं।पदकं।महापदकं।
मुक्तावली।एकावलिं।छन्नवीरं।केयूरयुगलंचतुष्टयं।वल
यावलिं।ऊर्मिकावली।कांचीदामं।कटिसूत्रं।सौभाग्याभ
रणं।पादकटकं।रत्ननूपुरं।पादांगुलीयकं।एककरेपाशं।
अन्यकरेंकुशं।इतरकरेपुंड्रेक्षुचापं।अपरकरेपुष्पबाणान्
श्रीमन्माणिक्यपादुके।स्वसमानवेषाभिरावरणदेवताभिः
सहमहाचक्राधिरोहणं।कामेश्वरांकोपवेशनं।अमृतचष
कंशाकिपात्रान्।आचमनंशुद्धजलेन।कर्पूरवीटिकां।आ
नंदोल्लासविलासहासं।मंगलार्त्तिक्यं।नवकर्पूरगर्भितदी
पिकाभिः।अथराजोपचाराः।छत्रं।चामरयुगलं।दर्पणं।ता
लवृंतं।गंधं।पुष्पं।धूपं।दीपं।नैवेद्यं।इति।अशक्तश्चेत्षोड

शोपचारानाचरेत् श्रीसूक्तस्य षोडशर्चाभिः। ते च। आसनस्वाग
ताऽर्घ्यपाद्याचमनमधुपर्काचमनस्नानवसनाभरणानिसुगंधसु
मनोधूपदीपनैवेद्यवंदनांतान्। अथवा दशौपचाराः कर्त्तव्याः। ते
च। अर्घ्यपाद्याचमनमधुपर्काचमनगंधादिनैवेद्यांताः। ॐ गणेश
ग्रहनक्षत्रेत्यादिवक्ष्यमाणद्वादशश्लोकैः स्तुत्वा योनिमुद्रया प्र
णमेन्मूलमंत्रं दशवारं जपेत्। कृत्वा राजोपचाराणि बिंदुपूजां सम
चरेत्। ३ मूलं श्रीमहात्रिपुरसुंदरीपराभट्टारिकां वा श्रीपादुकां
पूजयामि तर्पयामि नमः इति त्रिधा दशधा षोडशधा चतुर्धा वा दे
वीं विशेषार्घ्यबिंदुभिः संतर्प्य पुनर्विद्यां समुच्चरन् देवता परि
त्रिवारं पुष्पांजलीन् दद्यात्। अथ षडंगयुवतीपूजनं। ३ सर्वज्ञायै
श्रीपरांबायै ३ ह्रां हृदयाय नमः हृदयदेवी श्री० ३ नित्यतृप्तायै श्री

सैं ह्रीं श्रीं

प० ह्रीं शिरोदे० ३ अनादिबोधायै श्री० ह्रूं शिखादे० ३ स्वतंत्रायै श्री०
ह्रैं कवचदे० ३ नित्यमलुप्तायै श्री० ह्रौं नेत्रदे० ३ अनंतायै श्री० ह्रः अ
स्त्रदे०। अग्नीशासुरवायव्यमध्ये दिक्ष्वंगपूजनं। त्र्यस्रे विभाव्य
धरेखा अग्रदक्षोत्तरास्तथा। अकाराद्या दक्षकोणे उकाराद्या
स्तथाग्रके। एकाराद्या उत्तरस्यां नित्याः पंचोत्तरा दश। कामेश्वर्या
दिचित्रांतं वामावर्त्तेन पूजयेत्। बिंदोः पुरः स्वमंत्रेण नित्यामावर्त्त
येत्तिथेः। पंचोपचारैः संपूज्य त्रिवारं परितर्पयेत्। नित्यानां परिवर्त्त
नं निगदितं श्रीभोगपात्रामृतैः। नित्यामंत्रास्तु पूर्वमेवोक्ताः कृष्ण
पक्षे विचित्राद्या यावत्कामेश्वरी भवेत्। पूजनीया विलोमेन तिथि
नित्यां तु पूर्ववत्। मध्यमत्र्यस्रमध्ये गुरुमंडलमर्चयेत्। दिव्यौ
घादिगुरुक्रमात् कुलगुरोः पात्रामृतैरर्चयेत्। त्रिकोणाद्बहिः प्र

४तः ओघत्रयं पंक्तित्रयं क्रमेण पूजयेत् ।३ सांप्रदायपादुकां पू०
।३ ह्रीं क्लीं अमृतवर्षिणीपादुका परमेश्वरी वैषयट् पराभट्टारि
काश्री ।३ भट्टारिकानंदनाथश्री ।३ श्रीकंठानंदनाथश्री ।३
शक्तिधरानंदनाथश्री ।३ क्रोधीशानंदना ।३ इति दिव्यौघः ।३
त्र्यंबकानंदनाथ ।३ श्रीभट्टारिकानंद ।३ प्रतिभानंदना ।३ श्री
रानंदना ।३ इति सिद्धौघः ।३ संविदंबाश्री ।३ सच्चिदानंदना ।
।३ सदाशिवानंदना ।३ शिवानंद ।३ महेश्वरानंदना ।३ संविदं
बाश्री ।३ योगानंदना ।३ विद्यानंदना ।३ इति मानवौघः ।३ इति परा
पारंपर्यं ।३ परमशिवानंदना ।३ पराशक्त्यंबाश्री ।३ पराधि
क्रानंदना ।३ कौलेश्वरानंदना ।३ शुक्लांबा देवीश्री ।३ कामे
श्वरानंदना ।३ कामेश्वर्यंबाश्री ।३ इति दिव्यौघः ।३ भोगानंदना । ॥४८॥

क्लिन्नानंदना ।३ समयानंदना । सहजानंदना ।३ इति सि
द्धौघः ।३ गगनानंदना ।३ विमलानंदना ।३ विश्वानंदना ।३
भुवनानंदना ।३ वीरानंदना ।३ मदनानंदना ।३ स्वात्मानंदना ।
३ ललितानंदना ।३ प्रियानंदना ।३ इति मानवौघः ।३ इति कामरा
जपारंपर्यं ।३ कामेश्वर्यंबाश्री ।३ वज्रेश्वर्यंबाश्री ।३ भगमालि
न्यंबाश्री ।३ लोपामुद्रांबाश्री । अगस्त्यानंदना ।३ इति दिव्यौघः
३ कंकालानंदना ।३ धर्माचार्यानंदना ।३ मुक्तकेशेश्वर्यंबाश्री ।
३ दीपकलानाथश्री ।३ इति सिद्धौघः ।३ विष्णुदेवानंदना ।३ मा
तृगुलानंदना ।३ भोगानंदना ।३ मनोजानंदना ।३ कामानंदनाथ ।
३ कामेश्वर्यानंदना ।३ इति मानवौघः ।३ इति हादिपारंपर्यं ।३ पर
मेश्वरपरमेश्वर्यंबाश्री ।३ मित्रीशानंदना ।३ षष्ठीशानंदना ।

३उड्डीशानंदना०।३चर्यानंदना०।३लोपामुद्रांबाश्री०।३अग
स्त्यानंदना०।इति दिव्यौघः।३कालतापनानं०।३धर्माचार्यानंद०
३मुक्तकेशीश्वरानंद०।३दीपकलानंदना०।इति सिद्धौघः।३वि
ष्णुदेवानंदना०।३प्रभाकरदेवानंदना०।३तेजोदेवानंदना०।३मनो
जदेवानंदना०।३कल्याणदेवानंदना०।३रत्नदेवानंदना०।३वासु
देवानंदना०।३श्रीरामानंदना०।इति मानवौघः।३परमेष्ठीगुरु
श्री०।३परमगुरुश्री०।३स्वगुरुश्री०।इति गुरुपारंपर्यमर्चयेत्।अ
ग्नीशासुरवायव्यमध्ये दिक्ष्वंगपूजनं।श्रीपात्रामृतपूरितापर
कलाबिंदोषडंगं न्यसेत्।३ऐं क ४ सर्वज्ञताशक्तिधाम्ने ह्रां हृदय
शक्तिश्री०।३क्लीं ह ५ नित्यतृप्ताशक्तिधाम्ने ह्रीं शिरश०।३सौः स
३अनादिबोधशक्तिधाम्ने ह्रूं शिखाशक्तिश्री०।३ऐं क ४ स्वतं

त्रशक्तिधाम्ने ह्रैं कवचाय हुं कवचशक्तिश्री०।३क्लीं ह ५ नि
त्यमलुप्तशक्तिधाम्ने ह्रौं नेत्रत्रयाय वौषट् नेत्रशक्तिश्री०।३
सौः स ३ अनंतशक्तिधाम्ने ह्रः अस्त्राय फडिति अस्त्रशक्ति
श्री०।प्रपंचो भुवनं मूर्तिमंत्र दैवतमातरः।प्रणवादिनमोंते
नतत्नाम्ना समर्चयेत्।न्यासखंडोक्त तर्पयेत्।तर्पणानि
पुनर्दद्यात्त्रिवारं तत्त्वमुद्रया।पुष्पं समर्पयेद्देव्यै मुद्रयाज्ञा
नसंज्ञया।अथ न्यासखंडोक्त तर्पणं।३ह्सौः स्हौः अं०क्षं स
कलप्रपंचरूपायै श्रीपरांबादेव्यै श्री०।१५ अं०क्षं चतुर्दशभु
वनात्मिकायै श्रीपरांबाश्री०।१५६ चतुर्दशभुवनात्मिकायै श्री०
।१५६ सर्वमंत्रात्मिकायै श्री०।१५६ सर्वदेवतात्मिकायै श्री०।१५
६ सर्वमातृकात्मिकायै श्री०।इति षोढान्यासतर्पणं कुर्यात्।

सर्वसंक्षोभिणीमुख्यामुद्राः संदर्शयेत्ततः। अथावरण
पूजार्थं षडंगं पुनरर्चयेत्॥ ३ संविन्मये महेशानि परामृत
वरप्रिये। अनुज्ञां देहि मे देवि परिवारार्चनाय मे। प्रकटा
द्याश्च योगिन्यो महावीरवरप्रदाः। सान्निध्यं कुलयोगे
स्मिन्प्रकुर्वंतु शिवाज्ञया॥ इति लब्ध्वा देव्यनुज्ञां पुष्पांजलि
पुरःसरं। कुर्यादावरणार्चनं स्वविधिना श्रीशक्तिपात्रा
मृतैः। मेरुं मंत्रात्मकं चक्रं श्रीत्रिषष्ट्यत्र देवताः। कामेश्वरः
प्रकाशात्मा श्रीर्विमर्शस्तदंकगा॥ इत्येनद्वासनारूपमभेदं
च परस्परं। ज्ञात्वा श्रीगुरुवक्त्राब्जात्कृता पूजा महाफला॥
३ ऌं त्रैलोक्यमोहनचक्राय नमः। इति पुष्पांजलिं दत्वा। तत्र।
रेखायां प्रथमायां तु पश्चिमाद्यासु दिक्षु च। वायव्यादिवि

२२५०॥

दिक्षूर्ध्वमधश्च क्रमतो यजेत्। अथैंद्रेशानयोर्मध्ये ऊर्ध्व
मित्यभिधीयते। नैर्ऋत्यवरुणयोर्मध्ये अध इत्यभिधीयते॥ ३
प्रथमचतुरस्रमध्यरेखायै नमः। इति पुष्पांजलिं क्षिप्य॥ ३ अं अ
णिमासिद्ध्यंबाश्री॰। ३ लं लघिमासि॰। ३ मं महिमासि॰। ३ ईं ई
शित्वासि॰। ३ वं वशित्वासि॰। ३ प्रं प्राकाम्यसि॰। ३ भुं भुक्तिसि॰
३ इं इच्छासि॰। ३ प्रं प्राप्तिसि॰। ३ सं सर्वकामसि॰ एता रक्तप्र
भाश्चिंतामणिरत्नाभयांचिताः। त्रिलोचनाश्चंद्रकलामौ
लीर्ध्यायेदभीष्टदाः। रेखायां च द्वितीयां च पश्चिमादिक्रमा
द्यजेत्॥ ३ द्वितीयचतुरस्ररेखायै॰ इति पुष्पांजलिः। ३ अं आं
असितांगभैरवसहितब्राह्मीश्री॰। ३ इं ईं रुरुभैरवसहितमा
हेश्वरीश्री॰। ३ उं ऊं चंडभैरवसहितकौमारीश्री॰। ३ ऋं ॠं औ

थभैरवसहितवैष्णवीश्री॰।३ ॡंॡंउन्मत्तभैरवसहितवारा
हीश्री॰।३ ऌंऐंकपालभैरवसहितइंद्राणीश्री॰।३ ॐ औंभी
षणभैरवसहितचामुंडादेवीश्री॰।३ अंअः संहारभैरवस
हितमहालक्ष्मीश्री॰।एता वंशादलप्रख्या कपालोत्पलधारि
णीः।बंधूकपरिधानाश्च ध्येया ब्राह्म्यादि मानरः।रेखायां तु
तृतीयां तु प्रथमायामिवार्चयेत्।३ तृतीयचतुरस्ररेखायै॰ इ
तिपुष्पांजलिः।३ द्रां सर्वसंक्षोभिणीमुद्रांबाश्री॰।३ द्रीं सर्व
विद्राविणीमु॰।३ क्लीं सर्वाकर्षिणीमुद्रांबा॰।३ ब्लूं सर्ववशंकरी
मु॰।३ सः सर्वोन्मादिनीमु॰।३ क्रों सर्वमहांकुशामु॰।३ ह्स्खें सर्व
खेचरीमु॰।३ ह्सौः सर्वबीजमु॰।३ ऐं सर्वयोनिमु॰।३ ह्स्रैं हसक
लह्रीं ह्स्रौः सर्वत्रिखंडामु॰।एता रक्तवराभीतिपाशांकुशकरां

बुजाः।त्रिनेत्रा चंद्रकोटीराः संक्षोभिण्यादिशक्तयः।३ अंआं
सौः त्रिपुराचक्रेश्वरीश्री॰।३ प्रकटयोगिनीश्री॰।३ ॐ तारे तु
तारे तुरे स्वाहा बौधदर्शनश्री॰।अणिमासिद्धिपुरतश्चक्रे
शी त्रिपुरां यजेत्।सर्वसंक्षोभिणीमुद्रां तद्बीजेन प्रदर्शयेत्
।३ द्रां सर्वसंक्षोभिणीमुद्रायै नम इति मुद्रां प्रदर्शयेत्।एताः प्र
कटयोगिन्यस्त्रैलोक्यमोहने चक्रे सचक्राः सासनाः समुद्राः स
शक्तयः ससिद्धयो सायुधाः सवाहनाः सपरिवाराः सालंका
राः सचक्रेश्वरिकाः परयापरयापरापरया सपर्यया सर्वोपचा
रैः संपूजिताः संतर्पिताः संतु नमः इति सजलपुष्पाक्षतैश्च
क्रेश्वर्यै पूजां समर्प्य।देवीं शृंगाररसासिक्तां ध्यात्वा बिंदुत्रये
ण देवतां समर्पयेदिति।अभीष्टसिद्धिं मे देहि त्रिपुरे परमेश्व
रि।गृहाण मत्कृतां पूजां प्रथमावरणार्चनं।इति देव्यै सामान्या

र्घ्यौदकेन वामहस्तेन निवेदयेदिति प्रथमावरणं। संसर्वाशाप
रिपूरक चक्रायनमः इति षोडशदले पुष्पांजलिं दद्यात्। पश्चिमा
दि विलोमेन षोडशारे ऽर्चयेत् कलाः। ३ अं कामाकर्षिणीनित्या
कलांबाश्री। ३ आं बुध्याक०। ३ इं अहंकाराक०। ३ ईं शब्दाक०। ३ उं
स्पर्शाक०। ३ ऊं रूपाक०। ३ ऋं रसाक०। ३ ॠं गंधाक०। ३ ऌं चित्ता
क०। ३ ॡं धैर्याक०। ३ एं स्मृत्याक०। ३ ऐं नामाक०। ३ ॐ बीजाक०।
३ औं आत्माक०। ३ अं अमृताक०। ३ अः शरीराक०। एता ध्यायेत् क
लादेव्यः पाशांकुशकरांबुजाः रक्तांग्यो रक्तवसनाः सर्वाभर
णभूषिताः। ३ ऐं क्लीं सौः त्रिपुरेशी चक्रेश्वरीश्री। ३ लघिमासि
द्धिश्री। ३ गुप्तयोगिनिश्री। ३ ॐ तत्सवितु० प्रचोदयात्। परो
रजसेसावदों ब्रह्मदर्शनश्री। चक्रेशीं त्रिपुरेशीं च कामाक ११५३॥

ज्वलानि दिशतां मम वांछितानि। ३ सौः स ३ सोम चक्रे पूर्णगि
रिपीठे उड्डीशनाथात्मके अष्टार षोडशार चतुरस्र चक्रे शिवत
त्वात्मक संहृति कृत्य क्रियाशक्ति श्रीमहाभगमालिनी रुद्रात्म
शक्ति श्री०। ध्यानं। प्रत्यक् शशांक रुचिराश्रित वामकोणा पाशां
कुशाक्षगुण पुस्तक शस्त्र हस्ता। उद्भासयत्वनिशमद्भुत भूरिश
क्तिर्भाग्यश्रियं भगवती भगमालिनी मे। ३ ह्सैं ह्स्क्लीं ह्सौः त्रिपु
रांबा चक्रेश्वरीश्री। ३ ह्सौः स्हौः कौलिकदर्शनश्री। ३ इच्छासि
द्धिश्री। ३ अतिरहस्ययोगिनीश्री। ह्सौः सर्वबीजमुद्रायै० इ
ति मुद्रां दर्शयेत्। चक्रेश्वरीं त्रिपुरांबां कामेश्वर्यग्रतो यजेत्। इत्थं
पूज्य सर्वबीजामुद्रां तत्र प्रदर्शयेत्। एता अतिरहस्ययोगिन्यः सर्व
सिद्धिप्रदे चक्रे सचक्रा इत्यादि पूर्ववत्। देवीं अद्भुतरसात्मिकां ध्या
(८) येत्। अभीष्टत्यक्ष्मावरणं। ३ मं सर्वानंदमय बैंदव चक्रायनमः इ

तिपुष्पांजलिः।३सौः श्रीपराभट्टारिकाश्री०।३ऐं क्लीं सौः क१५प
रब्रह्मचक्रे महोड्याणपीठे चर्यानंदनाथात्मके समस्तचक्र सपरि
वारपरमसृष्टिस्थितिसंहारकृत्येच्छाज्ञानक्रियाशक्ति वाग्भव
कामराजशक्तिबीजात्मकपरमशक्तिस्वरूपश्रीमहात्रिपुरसुंद
रीपराब्रह्मात्मशक्तिश्री०।३आत्मसिद्धिश्री०।३परापररहस्ययो
गिनीश्री०।३तुर्याविद्याषोडशीविद्यास्वरूपश्रीमहात्रिपुरसुंदरी
राजराजेश्वर्यंबाश्री०।मूलेनद्वादशवारं संतर्प्य।३ऐं योनिमुद्रायै
नमइतिमुद्रां प्रदर्श्य।ध्यानं।सूर्येंदुवन्हिमयभास्करपीठगेहां
स्वेच्छागृहीतमणिपात्रशरेक्षुचापां।बालेंदुमौलिमरुणाभ
रणां त्रिनेत्रां नित्यां नमामि महतीं महनीयमूर्तिं।ब्रह्मशक्तिमहेशा
नितापत्रयनिकृंतिनि।सर्वानंदमये बिंदौ शक्तातीतेत्वगोचरे।३हस ।५२।
कलरडैं हसकलरडीं हसकलरडौः श्रीमहाचक्रेश्वरीश्री०।चक्रेशी

र्विणिकापुरः।पूज्य विद्राविणीमुद्रां तद्बीजेन प्रदर्शयेत्।३द्रीं स
र्वविद्राविणीमुद्रां प्रदर्शयेत्।एताः गुप्तयोगिन्यः सर्वाशापरिपू
रके चक्रे सचक्रा इत्यादि पूर्ववत्।देवीं वीररसात्मिकां ध्यात्वा
(2) अभीष्टसिद्धिं०इति द्वितीयावरणं।३हं सर्वसंक्षोभणचक्रायन
मइति अष्टदले पुष्पांजलिः।अष्टारे प्रागादिदिक्षु चत्वारि विदि
क्षु चयजेक्रमात्।३कं४ अनंगकुसुमादेव्यंबाश्री०।३चं४ अनंग
मेखलादे०।३टं४ अनंगमदनादे०।३तं४ अनंगमदनातुरादे०।३पं४
अनंगरेखादे०।३यं३ अनंगवेगिनीदे०।३शं षं सं अनंगांकुशादे०
।३हं ळं क्षं अनंगमालिनीदे०।देवीरक्तप्रभाइक्षुचापपुष्पेषुधा
रिणीः।वेणीकृतलसत्केशाध्यानव्यारक्तकंचुकाः।३ह्रीं क्लीं
सौः त्रिपुरसुंदरीचक्रेश्व०।३गुप्ततरयोगिनीश्री०।३ॐ ह्रीं

नमः शिवायशैवदर्शनश्री॰।३ महिमासिद्धिश्री॰।३ क्लीं सर्वकर्ष
णीमुद्रायै॰ इति प्रदर्शयेत्। अनंगकुसुमाग्रेतु यजेत्रिपुरसुंद
रीं। संपूज्य सर्वाकर्षिणी च मुद्रां च प्रदर्शयेत्। एताः गुप्ततरयो
गिन्यः सर्वसंक्षोभणचक्रे सचक्रा इत्यादि पूर्ववत् देवीं करुणारसा
त्मिकां ध्यायेत्। अभीष्टसिद्धिं॰। इति तृतीयावरणं। ३ सर्वसौभाग्य (3)
दायकचतुर्दशारचक्रायनमः इति पुष्पांजलिः। वामावर्तेन मन्वस्रे
पश्चिमादिविलोमतः।३ टं सर्वसंक्षोभिणीशक्तिश्री॰।३ ठं सर्व
विद्राविणीश॰।३ डं सर्वाकर्षिणीश॰।३ ढं सर्वाल्हादिनीश॰।३
णं सर्वसंमोहिनीश॰।३ तं सर्वस्तंभिनीश॰।३ थं सर्वजृंभिणीश॰
३ दं सर्ववशंकरीश॰।३ धं सर्वरंजिनीश॰।३ नं सर्वोन्मादिनीश॰।३ पं
सर्वार्थसाधिनीश॰।३ फं सर्वसंपत्तिपूरिणीश॰।३ बं सर्वमंत्रमयी

श॰।३ भं सर्वद्वंद्वक्षयंकरीश॰ एता रक्तप्रवालाभा ध्येया चापेषु
धारिणीः। चतुर्दशारे ध्यातव्याः संक्षोभिण्यादिशक्तयः।३ हैं ह्क्लीं
ह्सौः त्रिपुरवासिनी चक्रेश्वरी॰।३ ईशित्वसिद्धिश्री॰।३ संप्रदाययो
गिनीश्री॰।३ घृणिः सूर्य आदित्यो न प्रभा वात्यक्षरं मधुक्षरंति
तद्रसं। सत्यं वैतद्रसमापो ज्योती रसोमृतं ब्रह्म भूर्भुवस्स्वरां सौ
रदर्शनश्री॰।३ ब्लूं सर्ववशंकरीमुद्रामनुमुद्रयेत्। सर्वसंक्षोभिण्या
ग्रेतु यजेत्रिपुरवासिनीं। चक्रेश्वरीं पूज्य सर्ववश्यमुद्रां प्रदर्शयेत्
एताः संप्रदाययोगिन्यः सर्वसौभाग्यदायके चक्रे सचक्रा इत्या
दि सर्वं पूर्ववत्। देवीं भयानकरसात्मिकां ध्यायेत् अभीष्टेति च
(4) तुर्थावरणं।३ ऐं सर्वार्थसाधकबहिर्दशारचक्रायनमः इति पुष्पां
जलिः। पश्चिमादिविलोमेन देव्योभ्यर्च्य दशारके।३ कं सर्वसिद्धि

प्रदादेव्यंबाश्री०।३खंसर्वसंपत्प्रदादे०।३गंसर्वप्रियंकरीदे०।३
घंसर्वमंगलकारिणीदे०।३ङं०सर्वकामप्रदादे०।३चंसर्वदुःखवि
मोचिनीदे०।३छंसर्वमृत्युप्रशमनीदे०।३जंसर्वविघ्ननिवारिणीदे०
३झंसर्वांगसुंदरीदे०।३ञंसर्वसौभाग्यदायिनीदेव्यंबाश्री०।ए
तावराभयकरामुक्ताहारविभूषणाः।हिमवज्राभास्वरनूर्ध्वाये
त्सर्वार्थसिद्धिदाः।३ह्सैं ह्स्क्लीं ह्सौः त्रिपुराश्रीचक्रेश्वरीश्री०।३
वसित्वसिद्धिश्री०।३कुलोत्तीर्णयोगिनीश्री०।३ॐनमोनाराय
णायवैश्रवदर्शनश्री०।३सः सर्वोन्मादिनीमुद्रायैनमइतिमु
द्रांप्रदर्शयेत्।सर्वसिद्धिप्रदाग्रेतुपूजयेत्त्रिपुराश्रियं।चक्रेश्व
रींचसर्वोन्मादिनीमुद्रांप्रदर्शयेत्।एताःकुलोत्तीर्णयोगिन्यः
सर्वार्थसाधकेचक्रेसचक्राइत्यादिपूर्ववत्।देवींबीभत्सरसा ॥५४॥

न्याःपूर्वायाशास्कपूजयेत्।३पंचपंचिकाभ्योनमइतिपुष्पांजलिः
।३श्रीकु०१८महालक्ष्मीश्वरीवृंदमंडितासनसंस्थिता।सर्वसौभा
ग्यजननीश्रीविद्यालक्ष्मीश्वरीश्री०।३ श्रींमहालक्ष्मीएका
क्षरीश्री०।३श्रीं ह्रीं श्रींमहालक्ष्मिकमलेकमलालयेप्रसीद२ऐंह्रीं
श्रींमहालक्ष्मीश्वरीश्री०।३सिद्धलक्ष्मीश्वरीश्री०।३श्रींह्रींक्लींमहा
लक्ष्मीश्वरीश्री०।३त्रिशक्तिलक्ष्मीश्वरीश्री०।३ह्रींश्रींसौः महाल
क्ष्मीश्वरीश्री०।३साम्राज्यलक्ष्मीश्वरीश्री०।इतिपंचलक्ष्मीः।अथ
पंचकोशाः।बिंदौचपूर्वादिदिक्षुपूजनीयाः।३श्रीकु०१८पंचकोशे
श्वरीविद्यावृंदमंडितासनसंस्थितासर्वसौभाग्यजननीश्रीमहा
त्रिपुरसुंदरीश्री०।इतिबिंदौ।३ॐह्रींहंसःसोहंस्वाहापरानिष्क
लांबाश्री०।३श्रींह्रींसौः शांभवीश्री०।३ॐहंसःसोहंअजपांबाश्री०।३
अं५०मातृकांबाश्री०।अथपंचकल्पलताः।बिंदौपूर्वादिदिक्षुपूजये

सर्व

त्।३श्रीं क १४ पंचकल्पलतेश्वरी श्रीमहात्रिपुरसुंदरी श्री।१३ॐ
ह्रीं हुं खेचछेक्षः स्त्रीं हुं क्षें ह्रीं हुं फट् त्वरितांबा श्री।१३ॐ ह्रीं स्तौः
ह सकलह्रीं सरस्वत्यै नमः पारिजातकल्पलतांबा श्री।१३ श्रीं ह्रीं क्लीं
त्रिपुरांबा श्री।१३ द्रां द्रीं क्लीं ब्लूं सः पंचबाणेश्वर्यंबा कल्पलता श्री।।
अथ पंचकामदुघाः।३ श्रीं क १५ पंचकामधेनुविद्या श्रीमहात्रिपुरसुं
दरी श्री।१३ॐ ह्रीं हंसः संजीवनि जीवप्राणग्रंथिस्थं कुरु २ स्वाहा
अमृतपीठेश्वरी श्री।१३ ऐं ॐ ह्रीं ऐं वद २ वाग्वादिनि ऐं क्लीं क्लिन्ने क्लेदि
नि क्लेदय महाक्षोभं कुरु २ क्लीं सौः मोक्षं कुरु २ ह्सौः स्हौः सुधाल
क्ष्मी श्री।१३ ॐ ऐं ब्लूं स्त्रौं जूं सः अमृते अमृतोद्भवे अमृतेश्वर्यमृत
वर्षिणि अमृतप्रकाशिनि अमृतं स्रावय २ स्वाहा अमृतेश्वरी श्री।
३ ॐ ह्रीं श्रीं क्लीं ॐ नमो भगवति अन्नपूर्णेश्वरि मम अभिलषितमन्नं

दे हि स्वाहा कामधेन्वन्नपूर्णेश्वरी श्री।१इति बिंदौ पूर्वादि दिक्षु पू
जयेत्।अथ पंचरत्नेश्वर्यः।३ श्रीं क १५ पंचरत्नेश्वरी विद्या श्रीमहा
त्रिपुरसुंदरी श्री।१३ ॐ श्रीं ह्रीं फ्रें फ्रीं ह्स्ख्फ्रें २ ऐं श्रीं महातेजसंक
र्षिणि कालमथिनि ह्स्ख्फ्रें हूं ह्रीं सः स्वाहा ह्स्ख्फ्रें ह्रीं श्रीं सर्वसि
द्धियोगिन्यै ह्स्ख्फ्रें ह्रीं श्रीं सर्वसिद्धिमात्रे ह्स्ख्फ्रें ह्रीं श्रीं नित्योदि
तानंदितायै सकलचक्रनायिकायै भगवत्यै चंडकपालिन्यै द्रां द्रीं द्रूं
ह्स्ख्फ्रें क्ष्रौं नमः क्लीं सः स्हख्फ्रें परमहंसिनि निर्वाणमार्गप्रदे विषमोपप्लव
नाशिनि अमृतकुले सकलदुरितारिष्टक्लेशदमनि सर्वापदंभोधितारिणि
सकलशत्रुमर्दिनि देवि आगच्छागच्छ हस २ वल्ग २ नरुरुधिरांत्रवसा
भक्षिणि मम शत्रून्मर्दय २ खादिरत्रिशूलेन भिंधि २ खड्गेन ताडय २
छेदय २ स्हख्फ्रें नय रहसकलह्रीं हसक्षमलवरऊं सहक्षमलवरयईं

तावद्यावन्मम सकलमनोरथान् साधय२ परमकारुणिके देवि भगवति महाभैरवरूपधारिणि त्रिदशावरनमिते सकलमंत्रमातः प्रणतजनवत्सले हुं देवि महाकौलिनि कालनाशिनि हुं३ प्रसीदमदनातुरां आं ह्रीं क्रौं कुरु२ सुरासुरकन्यकां ह्रीं श्रीं क्रौं हुं फट् ह्स्रैं ह्स्क्ल्रीं ह्सौः ह्स्फ्रें फ्रीं हां हीं हूं ह्स्रैं ॐ हां हीं हूं ह्स्रैं ह्सौः नमः ॐ ह्रीं श्रीं सौः स्फूं श्रीं महालक्ष्म्यै नमः सिद्धविद्यारत्नेश्वरी श्री०ज्ञानार्णवे विशेषः१३ ग्रीं स्त्रीं महामखसंहर्षिणि कालमंथान ह्रां ह्रीं श्रीं सिद्धलक्ष्मी श्री०१३ ऐं क्लीं सौः ॐ नमो भगवति राजमातंगेश्वरि सर्वजनमनोहारिणि सर्वमुखरंजिनि क्लीं ह्रीं श्रीं सर्वराजवशंकरि सर्वस्त्रीपुरुषवशंकरि सर्वदुष्टमृगवशंकरि सर्वसत्ववशंकरि सर्वलोकवशंकरि सर्वजनं मे वशमानय स्वाहा सौः क्लीं ऐं श्रीं ह्रीं ऐं राजश्यामलांबा श्री०१३ ह्रीं भुवनेश्वर्यंबा श्री०१३ ऐं ग्लौं सौः क्लीं ॐ नमो भगवति

॥६०॥

ललितामेव बिंदौ संचिंत्य पूजयेत्। संपूज्य सुंदरीं सर्वयोनिमुद्रां प्रदर्शयेत् १३ ऐं सर्वयोनिमुद्रां प्रदर्शय१३ एषा परापररहस्ययोगिनी सर्वानंदमये बिंदे चक्रे परब्रह्मस्वरूपिणि परामृतशक्तिः सर्वेश्वरि सर्वपीठेश्वरि सर्ववीरेश्वरी सर्ववागीश्वरि सर्वसिद्धेश्वरि सकलत्रैलोक्येश्वरि सकलजगदुत्पत्तिस्थितिसंहारमातृका सचक्रा सासना समुद्रा सशक्तिः ससिद्धिः सायुधा सवाहना सपरिवारा सालंकारा सचक्रेश्वरिका परया अपरया परापरया सपर्यया सर्वोपचारैः संपूजिता संतर्पितास्तु नमः इति सजलपुष्पैः समर्प्य देवतां त्रिः संतर्प्य। शांतिरसात्मिकां ध्यायेत्। अभीष्टेति नवमावरणं। तर्पणानि पुनर्दद्यात्। त्रिवारं विधियातः। षडंगं तर्प्य योन्याद्याः नवमुद्राः प्रदर्शयेत्। देव्यै पुष्पांजलिं दत्वा विद्यामंत्रान् पीनरान् त्रिः संतर्प्य क्रमेणैकमादिनाथान् गुरून्यजेत्। देवतायाः पुरोभागे तर्पयित्वाथ सा

(८)

थकाः।३ आदिगुरुपरमशिवानंदनाथश्री।३ सदाशिवानं।३ ई
श्वरानं।३ रुद्रानं।३ विष्णानं।३ ब्रह्मानं।३ सनकानं।३ सनंदनानं।
३ सनातनना।३ सनत्कुमारानं।३ रैवतकानं।३ दत्तात्रेयानं।३ व्यासा
नं।३ शुकानं।३ महानं।३ चौंडिकेशानं।३ महामंगलयोगीशानं।
३ परानं।३ शंकरानं।३ चंद्रचूडानं।३ श्रेष्ठानं।३ विश्वनाथोमहानं।
३ चिदानं।३ विद्यारण्यो महाकौलानं।३ कंतुकीशानं।३ निर्मला
नंदयोगीशानं।३ गंधानं।३ चिद्रूपानंदयोगीशानं।३ नाथानं।३ वि
मलानंदयोगीशानं।३ विश्वानंदना।३ श्रीसिद्धयोगिनीश्री।३ आ
त्मानं।३ परमेष्ठीगुरुश्री।३ परमगुरुश्री।३ स्वगुरुश्री।इति षट्त्रिं
शत्संख्याकान् गुरून्पूजयित्वा थपंचपंचिकाः पूजयेत्। ततो बिंदोश्च
तुर्दिक्षु यजेदाम्नाय देवताः। पूर्वं दक्षिणमाम्नायपश्चिमं चोत्तरं त
था। ततः प्रपूजयेद्दिक्षु मध्ये च पंचपंचिकाः। आद्यां मध्ये चतस्रो ११२०॥

वार्तालि २ वाराहि २ वराहमुखि २ अंधे अंधिनि रुंधे रुंधिनि स्तंभे स्तं
भिनि मोहे मोहिनि जंभे जंभिनि सर्वदुष्टप्रदुष्टानां वाक्चित्तचक्षु
र्मुखगतिमति क्रोधजिह्वा स्तंभं कुरु २ शीघ्रं वश्यं कुरु २ क्लीं सौः ग्लौं
ऐं ठः ठः हुं फट् स्वाहा बृहद्वाराहिश्री।इति बिंदौ पूर्वादि दिक्षु पूज
येत्। अथ पंचसिंहासनपूजा। ह्स्त्रीं ह्स्क्लीं ह्स्क्रौं चैतन्यभैरविश्री। इति
सृष्टिचक्रे।३ ह्स्रैं हसकल ह्रीं ह्स्कां रुद्रभैरविश्री। स्थितिचक्रे।३
डरलक स्हैं डरलक स्हीं डरलक स्हौं षट्कूटाभैरविश्री।३ श्रीं ह्रीं
हसकलरडैं हसकलरडीं हसकलरडौः नित्याभैरवीश्री। संहारच
क्रे।३ स्हैं हसकल ह्रीं ह्सौं भुवनेश्वरीश्री। नवचक्रेषु।३ श्रीं ह्रीं ह्स्त्रां ह
सकलरीं हसरौं संपत्प्रदाभैरवीश्री। बिंदौ। अथ चतुःसमयपूजा। त
त्र बिंदुचक्र एव मूलदेव्यग्रे ३ ऐं क्लीं सौः ॐ नमः कामेश्वरि इच्छाकाम
फलप्रदे सर्वसत्ववशंकरि सर्वजगत्क्षोभकरि हुं मां द्रां द्रीं क्लीं ब्लूं सः

सौः क्लीं ऐं कामेश्वरि समयदेवता श्री॰। देव्या वामे ३ ऐं ह्रीं सर्वकार्यार्थसा ८
धिनि वज्रेश्वरि वज्रपदे वज्रपंजरमध्यगते ह्रीं क्लिन्ने ऐं क्रों नित्यमदद्रवे ह्रीं
महावज्रेश्वरी नित्यायै नमः वज्रेश्वरी समय॰। दक्षिणे भगमालिनी नि
त्याविद्यामुच्चार्य भगमालिनि समयदे॰। एवं त्रयं सकृत्सकृत्पुष्पैः
पूजयित्वा श्रीपात्रबिंदुभिः संतर्प्य मध्ये मूलविद्यामेव ३ क्लीं भगव
ति क्लिन्ने नित्ये कामेश्वरि ह्रीं सर्वसत्त्ववशंकरि सः त्रिपुरभैरवि ऐं विश्वे
क्लीं श्रीमहात्रिपुरसुंदर्यै नमः श्रीमहात्रिपुरसुंदरी समयदे॰ इति स
प्तवारं केवलं पुष्पैः पूज्य विशेषार्घ्यबिंदुभिः संतर्प्य क्लीमिति स्व
स्थापनमुद्रां बध्वा मूलविद्यया प्रदर्श्य हूमिति मुंचेदिति चतुःसमय
पूजा। अथाम्नायपूजा। ३ ह्सैं ह्स्क्लीं ह्सौः पूर्वाम्नायसमयविद्येश्वर्यं
बा श्री॰। ३ ऐं क्लीं क्लिन्ने क्लिन्नमदद्रवकुले ह्सौः दक्षिणाम्नायस॰। ३ ह्स्कैं
ह्स्रौं ह्स्रौं भगवत्यंब ह्स्कैं ह्स्क्रीं कुब्जिके ह्स्रां ह्स्रीं ह्स्रूं अघोरे ३ अघो

रमुखि छ्रां छ्रीं किणि २ विच्चे ह्स्रौं ह्स्क्रौं ह्रीं ऐं पश्चिमाम्नाय॰। ३ स्ह्रक्ष्म्रें
महाचंडयोगेश्वरि उत्तराम्नायस॰। ३ म र ख फ र एं महाचण्डयोगए
श्वावरु ऊर्ध्वाम्नायस॰। ३ ह्रीं स्हौः औं अः अं आं हं ह्सौः अं सौः अं आं हं अ
नुत्तराम्नायस॰। बौद्धवैदिकशैववानिसौरं विष्णुचक्रगणकं। चतुरस्रेषो
डशारे अष्टपत्रे चतुर्दशे। द्विदशारे षट्कोणेषु दर्शनानि च पूजयेत्। ३ ॐ
तारे तुत्तारे तुरे स्वाहा बौद्धदर्शनश्री॰। ३ ॐ भूर्भुवः स्वः तत्सवितुः॰ वैदिक
दर्शनश्री॰। ३ ॐ ह्रीं ह्सौं नमः शिवाय शैवदर्शनश्री॰। ३ ॐ घृणिः सूर्य सौ
रदर्शनश्री॰। ३ ॐ नमो नारायणाय वैष्णवदर्शनश्री॰। ३ ह्रीं शाक्तदर्शन
श्री॰। पुनः शिवादिस्वगुरुपर्यंतं तर्पयेदादौ शिवगुरुरिति। कराभ्यां चि
न्मुद्रामिति ध्यायेत्। ततः पुनः षडंगं विधाय पूजयेत्। ॐ ह्रीं हंसः सो
हं स्वाहा आसशक्ति श्री॰। ततो भूतमंत्रैर्देव्याः शरीरे यजेत्। ३ अं आं एकं
चं टं तं पं यं षं प्राणश॰। ३ इं ईं ऐं खं छं ठं थं फं रं क्षं अग्निश॰। ३ उं ऊं ॐ गं जं

उं दं बं लं ळं धरात्रा॰।३ ॠं ॠं औं घं सं ढं धं भं वं सं अंबुद्रा॰।३ ऌं ॡं अं अः उं
अं णं नमं द्राहं खद्रा॰ ततो मूलेन पुनः षडंगं संपूज्य चक्राद्बहिः पूर्वीक्रान्द्र
शादिशाधिपतीन्सायुधान्यजेदिति१॰ पुनर्मूलेन समष्टिमंत्रेण च देवीं
पूजयेत् तर्पयेत्र।३ ऐं क्लीं सौः हे घंटे स्फ स्वरेणापि घंटाध्वनिविभूषि
ते। वादयंति परानंदे घंटामेवं प्रपूजयेत्। घंटामनेन मंत्रेण संपूज्य परि
वादयेत्।६ चंद्र चंदन कस्तूरि कुंकुमागरु रोचनैः। संभृतं हिमसारा
ढ्यं गंधमाकल्पयाम्यहम्। श्रीपरांबायै गंधं कल्पयामि नमः।६ पवित्रम
नघं रम्यं वासितं गंधवारिणा। स्फ गंधि विलसत्पुष्पमादरादर्पयाम्यह
म्। श्रीपरांबायै पुष्पं कल्पयामि नमः।६ तुरीयवनसंभूतं नानागुणम
नोहरम्। आनंदसौरभं पुष्पं गृह्यतामिदमुत्तमम्। पुष्पं। वनस्पतिर ॥६०॥
सोसन्त्रैः पवित्रैरम्यगंधिभिः। दशांगाद्यैर्धूपवर्यैर्धूपयेसरमेश्वरीम्
श्रीपरांबायै धूपं कल्पयामि नमः।६ स्फ प्रकाशो महादीपः सर्वत्र

तिमिरापहः। सबाह्याभ्यंतरंज्योति दीपोयं प्रतिगृह्यताम्। श्रीपरां
बायै दीपं कल्पयामि नमः।६ हेमपात्रगतं दिव्यं परमान्नं स्फ संस्कृतं। पं
चधा षड्रसोपेतं गृहाण परमेश्वरि। शर्करापायसापूप घृतव्यंजन
सम्पदा। विचित्ररुचि नैवेद्यं हृद्यमावेदयाम्यहं। नैवेद्यपात्राधः चतु
रस्रमंडलं विधाय तत्राधारोपरि अन्नं सावि शुद्धियुक्तं निधाय प
रिस्तीर्य प्रोक्षणीजलेन त्रिर्मूलेन प्रोक्ष्य विशेषार्घ्यबिंदुं दत्वामू
लेन दशधाभिमंत्र्य सोमकलाभिरन्नं संपूज्य वैदिकगायत्र्या पुन
रभिमंत्र्यापोशनं दत्वा प्रार्थयेत्।३ ऐं परायै पादुकायै सांगायुधा
यै सपरिवारायै श्रीमहात्रिपुरसुंदर्यै नमः नैवेद्यं कल्पयामि नमः
।३ क्लीं अपरायै पादु॰।३ सौः परापरायै पा॰।३ ऐं क्लीं सौः सर्वदेवतास्वरू
पिण्यै श्रीमहात्रिपुरसुंदर्यै नैवेद्यकं॰। घंटावादनपूर्वकं भुंजाना

ध्यायन्नैवद्यमुद्राः प्रदर्शयेत्। ऐं प्राणाय स्वाहा इत्यंगुष्ठकनिष्ठाना
मिकाभिः। क्लीं मपानाय स्वाहा इत्यंगुष्ठतर्जनीमध्यमाभिः। सौः व्या
नाय स्वाहा इत्यंगुष्ठानामिकामध्यमाभिः। सौः उदानाय स्वाहे त्यंगुष्ठा
नामिकातर्जनीभिः। ऐं क्लीं सौः समानाय स्वाहे त्यंगुष्ठसर्वांगुलिभिः। म
ध्ये पानीयं दत्वा। ३ हं सर्वशक्तियुक्तायै श्रीमहात्रिपुरसुंदर्यै नैवेद्यं स्वा
हा। ब्रह्मेशाद्यैः स्वरसमभितः सूपविष्टैः समंताद्दिव्याकल्पैर्ललिततर
लैर्वीज्यमाना सखीभिः। नर्मक्रीडाप्रहसनपरा हासयंती सुरेशान्
भुंक्ते पात्रे कनकखचिते षड्रसान्लोकधात्री। ३ ऐं क्लीं सौः किशोरि
ना काश्री इति बिंदुं संतर्प्य। अनेकभोगनैवेद्यं गृण्ह २ स्वाहेति प्रार्थ्य। ३
ऐं क ४ आत्मतत्वाधिपतिर्महात्रिपुरसुंदरी तृप्यतु। ३ क्लीं ह ५ विद्या
तत्वाधिपतिर्महात्रिपुरसुंदरी तृप्यतु। ३ सौः स ३ शिवतत्वाधिपतिर्म
हात्रिपुरसुंदरी तृप्यतु। ऐं क्लीं सौः क १४ सर्वतत्वाधिपतिर्महात्रिपुरसुं
दरी तृप्यतु। ततो मूलं दशधा जप्य समर्प्य योनिमुद्रया प्रणम्य होमं कु
र्यात्। चिदाभासमयं वन्हिं कुर्वे होम्यं पुनरुद्भवं। ब्रह्मरंध्रोदितं होमं वि
धाय विश्वरूपं स्मरेत्। शिखासंख्याभिजप्तेन केवलेनैव बिंदुना। श्री
गुरुपादुकां शिरसि विन्यस्य पंचस्थानेषु सप्तविंशतिधा शिखा। ना
भौ चिदग्निसाक्षात्सविद्यया तस्य संस्कृतिः। स्वात्ममूलत्रिकोणस्थे
सूर्यकोटिसमप्रभे। कुंडल्याकृतिचिद्वन्हौ हुनेद्द्रव्यं समंत्रकं। अथवान्यप्र
कारेण नित्यहोमं कुर्यात्। अग्न्याधानादिकं कर्म नित्यहोमे न विद्यते इ
ति वसिष्ठसंहितावचनात्। लौकिकाग्निमेव मूलेन दिननिशा विद्यया
वभ्युक्ष्याभिमंत्र्य देवीरूपं ध्यात्वा परिषिच्य वन्हिदेवतयोरैक्यं विभाव्य
त्रितारमूलमुच्चार्य श्रीमहात्रिपुरसुंदर्यग्नये नमः इति गंधपुष्पाक्षतैः
संपूज्य आज्यादिकं वमिति धेनुमुद्रयामृतीकृत्य मूलविद्यया त्रिरभिमंत्र्य

तेनहविषामूलंस्वाहांतंषोडशाहुतीर्हुत्वा।३समस्तप्रकटेत्यादिसमष्टिमं
त्रेणस्वाहांतेनैकामाहुतिंजुहयात्।ततस्तिथिनित्याषोडशनित्यागुरुपं
क्तित्रयषडंगयुवतीनवावरणशक्तिभ्यस्तत्तन्मंत्रेणैकैकामाहुतिंहुत्वा
पुनःसमष्टिमंत्रेणाहुतित्रयंजुहुयात्।अत्राप्यशक्तौषडंगयुवतीहोमानं
तरंसमस्तप्रकटेत्यादिसमष्टिमंत्रेणाहुतित्रयंहुत्वासप्तजिह्वाख्यमुद्रा
प्रदर्श्यसमापयेत्।मणिबंधास्थितौकृत्वाप्रसृतांजलिकौकरौ।कनिष्ठां
गुष्ठयुगलमिलित्वांतःप्रकाशयेत्।सप्तजिह्वाख्यमुद्रेयंवैश्वानरप्रियंकरी
होमानंतरंहोमसमसंख्याकंषोडशवारंवामूलंसंजप्यनिवेद्ययोनिम्रण
म्यबलिदानंकुर्यात्।ततःश्रीचक्रपुरतःचंदनेनचतुरस्रवृत्तत्रिकोणमंड
लंकृत्वाॐकुरुकुल्ले स्वाहेतिमंत्रेणमंडलंसंपूज्यतत्रसाधारंसान्नव्यं
जनजलपूर्णपात्रत्रयमेकंवासंस्थाप्यविशेषार्घ्यबिंदुंदत्वाॐकुरुकुल्ले
स्वाहाकुरुकुल्लायाःपुनःएवमेव।ॐकुरुकुल्लेह्रींसर्वजनंमेवशमानयस्वा ॥६४॥

हा।एभिस्त्रिभिर्मंत्रैर्दक्षहस्तोत्थितविशेषार्घ्यजलधारांवामकरांगु
लिभिःसहक्रमेणपात्रत्रयवादद्यात्।तत्रस्ववामभूभागेसाधकोभूमि
जानुगः।त्रिकोणंवृत्तभूबिंबंमंडलंप्रथमंलिखेत्।वाग्भवांतेव्यापकांते
मंडलायनमोमनुंजपतन्मंडलंपूज्यसापूपंजलपायसं।सशुद्धिबिंदूपदंश
गंधपुष्पाक्षतैर्यजेत्।स्थाप्यात्रपात्रंसाधारंप्रत्येकंतदनंतरं।पश्चिमेबटु
कंदेयमुत्तरेयोगिनीबलिं।पूर्वेभूतबलिंदद्यात्क्षेत्रपालंतुदक्षिणे।राज
राजेश्वरंमध्येराक्षसेगणपंयजेत्।मंडलानिविधायैवंबटुकादीन्क्रमा
द्यजेत्।३बंबटुकायनमः।३योयोगिनीभ्यःस्वाहा।३भुंभूतेभ्योनमः।
३क्षंक्षेत्रपालाय०।३रांराजराजेश्वराय०।३गंगणपतये०।एवंसंपूज्यगंध
द्यैर्बलीन्दद्याद्यथाक्रमं।३एह्येहिदेविपुत्रबटुकनाथकपिलजटाभास्व
रपिंगलनेत्रज्वालामुखइमांपूजांबलिंगृह्णगृह्णस्वाहा।वामांगुष्ठानामि
काभ्यांबटुकस्यबलिंहरेत्।बलिदानेनसंतुष्टोबटुकःसर्वसिद्धिदः।शां
तिंकरोतुमेनित्यंभक्तवेना[illegible]सेवित।सर्व[illegible]अंगुष्ठैर्योगिनीब

लिः॥३ सर्वयोगिनीभ्यः सर्वभूतेभ्यः सर्वभूतादिवर्त्तिनीभ्यो डाकिनीभ्यः
शाकिनीभ्यस्त्रैलोक्याधिवासिनीभ्य इमां पूजां बलिं गृण्हंतु स्वाहा॥ या
काचिद्योगिनी रौद्रा सौम्या घोरतरापरा। भूचरी खेचरी व्योमचरी प्रीता
स्तु मे सदा। इत्युत्तरे पुष्पांजलिं दत्वा योनिमुद्रया प्रणमेत्॥ अंगुली मिश्च
सर्वाभिरक्षो भूतबलिः प्रियो॥३ सर्वभूतेभ्यः सर्वभूतपतिभ्यो नमः॥ भू
ता ये विविधाकारा दिवि भौमांतरिक्षगाः। पातालतलसंस्थाश्च शिवयो
गेन भाविताः। ध्रुवाद्याः सत्यसंधाश्च इंद्राद्याश्च व्यवस्थिताः। तृप्यंतु
प्रीतमनसो भूत्वा गृण्हंत्विमं बलिं। इति पूर्वे पुष्पांजलिं दत्वा योनिमुद्र
या प्रणमेत्॥ अंगुष्ठतर्जनीभ्यां तु क्षेत्रपालबलिर्भवेत्॥३ एह्येहि देविपु
त्राय बटुकनाथाय उच्छिष्टहारिणे गृण्ह २ क्षपणक्षेत्रपाल सर्वविघ्नान्ना
शय २ परिवारसहित इमां पूजां बलिं गृण्ह २ स्वाहा॥ ह्रौंः ह्रां ह्रीं ह्रूं युगांत
भैरवादि लीलया क्षोभ्यानंद हृदयाभीष्ट सिध्यर्थमवतरानर क्षेत्रपा
ल महाशाक बटुकनाथ देविपुत्र मातृपुत्र कुलपुत्र सिध्यपुत्रास्मिन्स्थ

नाधिपतेस्मिन्ग्रामाधिपतेस्मिन्देशाधिपतेस्मिन्मेघनाथ प्रचंडोग्र
कपाल भीम भीषण सर्वविघ्नाधिपते इमां पूजां बलिं गृण्ह २ तुरु २ मुरु २
चूर्णय २ ज्वल २ प्रज्वल २ सर्वविघ्नान्नाशय २ ह्रां ह्रीं ह्रूं क्षां क्षीं क्षूं क्षेत्र
पालाय वौषट् हुं। यो स्मिन्क्षेत्रे निवासी च क्षेत्रपालस्य किंकरः। प्रीतो
यं बलिदानेन सर्वरक्षां करोतु मे। इति दक्षिणे पुष्पांजलिं दत्वा योनिमुद्र
या प्रणमेदिति क्षेत्रपालबलिः॥ अंगुष्ठमध्यमाभ्यां तु राजराजेश्वरस्य
च॥३ अमुकक्षेत्रपाल राजराजेश्वरेमां पूजां बलिं गृण्ह २ स्वाहा॥ अ
नेन बलिदानेन बटुकवर्गसमन्वितः। राजराजेश्वरो देवो मे प्रसीदतु
सर्वदा। तथा मुष्टेस्तु मध्यस्थामंगुलिं दंडवत्कुरु। गजतुंड महासुद्रा ग
णपस्य प्रियंकरी। गां गीं गूं गं गणपतये वरवरद सर्वजनं मे वशमानय
मां पूजां बलिं गृण्ह २ स्वाहा। कपालपाशांकुश योनिघर्षचिन्हैश्च तु
र्बाहुभिरुज्वलंतं। गाढोपगूढासननुं निजांकसंसक्तशात्यारुणकां
तिमीडे। एकत्र वा बलिं चात्र दद्यादुदकमंडले। दद्यायेद्यथना राचमुद्रां ना

रत्रयंवदेत्।३ ॐ ह्रींसर्वविघ्नकृद्भ्यः सर्वभूतेभ्योहुंस्वाहाइति।देव्यै
उत्तरापोशानहस्तप्रक्षालनगंडूषाचमनीयानिदद्यात्।३तमालदल
कर्पूरपूगभागसमन्वितं।एलापत्रिसमायुक्तंतांबूलंकल्पयाम्यहं।३
छत्रंचामरयोर्युगंव्यजनकंचादर्शकंनिर्मलंभेरीशंखमृदंगतालकह
लागीतंचनृत्यंतथा।साष्टांगंप्रणतिंस्तुतिंबहुविधामेतत्समस्तंमया
संकल्पेनसमर्पितंतवविभोभोगायतेनिस्यद्राः।गतसारंनैवेद्यंनैर्ऋ
त्यांदिशिसंस्थाप्यहस्तंप्रक्षाल्यप्रसन्नपूजांकुर्यात्।३मूलंश्रीपरांबा
येगंधंसमर्पयामिनमः एवंप्रकारेणपुष्पधूपदीपनैवेद्यदक्षिणांनम
स्कारांतैःसप्तभिरुपचारैरुपचर्यआरार्त्तिकंकुर्यात्।सौवर्णेराजतेकां
स्येस्थालकेपरमेश्वरि।कुंकुमेनलिखेत्सप्तपंचवस्तुपत्रंमनोहरं।ईषत
क्तस्तुपिष्टेनकुर्याद्देवांगुलोन्नतान्।दिव्यान्डमरुकाकारान्त्रिको
णाननतिशोभनान्।प्रकर्षग्राहिणःकुर्यान्नवसप्ताथपंचवा।दे

११६६।१

व्याःपुरस्त्रिकोणंचचतुरस्त्रंचवर्तुलं।विधायमंडलंतत्रस्थाप्यदीपा
न्प्रकाशयेत्।मायाबीजेनकुसुमैर्गंधाद्यैश्चप्रपूजयेत्।३ऐंमहादीप
तेजोवतिअमोघज्ञानप्रभामालिनिभगवतिविच्चेऐंक्लिंन्नेनमः।मंत्रे
णयुत्यमालिन्यागंधाद्यैःपूजयेत्पुनः।जानुभ्यामवनिंगत्वादीपभा
जनमुद्धरेत्।३श्रीं ह्रीं ग्लूं प्लूं स्लूं म्लूं न्लूं ह्रीं श्रीं इतिरत्नेभ्यर्यानववारं
प्रपूजयेत्।अंतस्तेजोबहिस्तेजएकीकृत्यामितप्रभं।त्रिधादेव्यैपरि
भ्राम्यकुलदीपान्निवेदयेत्।३समस्तचक्रचक्रेशीयुतेदेविनमालि
के।आरार्त्तिकमिदंतुभ्यंगृहाणममसिद्धये।आरार्त्तिकंनिवेद्यैवं
स्थापयेत्पूर्वमंडले।इति।चक्रमुद्रांप्रदर्श्य।चक्रमुद्रायथा।वामह
स्तांगुष्ठगर्भेदक्षांगुष्ठंविनिक्षिपेत्।अन्योन्यग्रथितेदेविचक्रमुद्रास
मीरिता।ततःपुष्पांजलिंगृहीत्वामूलमुच्चार्यसमस्तप्रकटगुप्तगु
प्ततरसंप्रदायकुलकौलनिगर्भरहस्यातिरहस्यपरापररहस्यपरा

परातीतरहस्ययोगिनीभ्यस्त्रैलोक्यमोहनसर्वाशापरिपूरकसर्वसं
क्षोभणसर्वसौभाग्यदायकसर्वार्थसाधकसर्वरक्षाकरसर्वरोगह
रसर्वसिद्धिप्रदसर्वानंदमयेषुनवचक्रेषु सांगाः ससिद्धयः सासना
सायुधाः सपरिवाराः सालंकाराः सर्वोपचारैः पूजितास्तर्पिताः संतु
नमः इति पुष्पांजलिं दत्वा साशंगं प्रणम्य स्वासने समुपविश्य पुनः मूले
न पुष्पांजलिं दत्वा योनिमुद्रया प्रणमेत्। ततः शक्तिमाहूय पूजां कुर्यात्
आयाहि वरदे देवि मंडलोपरि सर्वदा पूजां गृहाण देवेशि शत्रूणां क्षय
कारिणी। स्ववामभागे त्रिकोणषट्कोणवृत्तचतुरस्रात्मसमंडलं मत्स्य
मुद्रया कृत्वा तत्रासनं परिकल्प्य सर्वलक्षणसंपन्नां स्ववासिनीं सं
स्थाप्य तच्छिरसि त्रिकोणं विचिंत्य देवीकलामावाह्य श्रीं नमः पादौ पू
जयामि। क्षारकुलयोगिनी पा पू०। ६ पादकुलयोगिनी पादुकां पू०। ३ कुंड
कुलयोगिनीपा०। ३ अकुंडकुलयोगिनी श्रीपा०। ३ रूपकुलयोगिन्यै०। ३

हूं रूपकुलयोगिनी श्री०। ३ स्ववासिन्यै०। ३ स्ववासिनी श्री०। ३ शक्तेः पादौ
प्रक्षाल्य गंधाद्यैरर्चयित्वा समाहितः सदक्षिणां तांबूलं दत्वा तया सह
देव्यै समष्टिमंत्रेण पुष्पांजलिं दद्यात्। आरभ्य देवताबुध्या शक्तिपात्रा
मृतेन च। तर्पयेदिति शेषः। प्रथमपात्रं सशुद्धिकं दत्वा प्रार्थयेत्। चिच्चंद्र
कुंडली योगात् सारमस्य स्वबोदये। गृहाणामृतपात्रं तु प्रथमं बिंदुवाहि
नि। ततः द्वितीये। अलिपात्रमिदं तुभ्यं दीयते पिशिनान्वितं। स्वीकुरुस्व
भगे देवि जयं देहि रिपून् दह। ततस्तृतीये। कामकामेश्वराभीष्टकामदा
नविनोदिनि। गृहाण दीयते पात्रं त्रिपुरारिकुटुंबिनि। अधिकारिणी चे
त् चतुर्थं दद्यात्। तत्प्रार्थना। भगमालिनि भर्गाणि स्वर्गापवर्गदायिनि।
भवानि भरितं पात्रं गृण्ह मातश्चतुर्थकं। इति तत्तच्चर्यं शक्त्यै भक्त्या
सम्यक् प्रदापयेत्। पात्रं दद्यात्। आनंदेन विना देवि न तृप्यंती हमा
नरः। तस्मादानंदसिद्ध्यर्थं पात्रं देहि वरानने। इति। सापि। वत्स तु
भ्यं मया दत्तं पीतशेषं कुलामृतं। त्वदीयशत्रून् संहृत्य नवाभीष्टं द

दाम्यहं।इतिवदंतीपात्रं साधकाय शेषामृतपूर्वकं दद्यात्।साधक
स्तदुररीकृत्य तां चतुर्भिरुपचारैः संतोषयेत्।तथेस्रुक्कामृतं दत्तं
स्वयं तत्त्वत्रयं पिबेत्।आदाय च गुरोः साक्षादादिशक्तिमुखांबुजा
त्।गलितं परमानंदं रससारं पिबाम्यहं।इस्रुक्कां पिबेत्।तदंतेक
न्यकाश्चापि प्रमदाश्च मनोहराः।संपूज्य दद्यात्पात्राणि शक्तिपात्र
स्थबिंदुना।इति शक्तिकुमारीपूजनं।ततः बटुकं पूजयेत् ३ ॐ बटु
कायनमः इति गंधादिपंचोपचारैः पूज्य बलिपात्रामृतेनैकमेव पा
त्रं दद्याद्विसृजेत्।ततः।श्रीगुरोः पात्रमुत्थाप्य गुरवे देवतासने।शि
रःपद्मासनस्थाय श्रीपराबीजपूर्वकं।श्रीपादुकां समुच्चार्य त्रिधा
भक्त्या निवेद्य च।तत्पात्रं स्वस्थले स्थाप्य तत्पात्रमभिवंद्य च।जा
नुभ्यामवनीं गत्वा प्रणम्य चुलुकत्रयं।गृहीत्वा पुनरानम्य पात्रमु
त्थाप्य भक्तिमान्।कराभ्यां चिन्मुद्रामिति ध्यायेत्।ततः सामायिकैः
शिष्यैर्दासनावस्थितैः सार्कं पाणी प्रक्षाल्य वीरपूजनं वीरेभ्यो ॥६५॥

नमः इति गंधपुष्पधूपदीपनैवेद्याद्युपचारान्समर्पयेदिति ततस्तैः
सह समष्टिमंत्रेण देव्यै पुष्पांजलिं दत्वा तेभ्यो भोगपात्रादमृतपात्रा
णि दद्यात् स्वयं च आत्मपात्राद्गृहीत्वा तत्त्वशोधनं कुर्याद्यथा।३
प्रकृत्यहंकारमनोबुद्धित्वक्चक्षुःश्रोत्रजिह्वाघ्राणवाक्पाणिपा
दपायूपस्थशब्दस्पर्शरूपरसगंधाकाशवाय्वग्न्यप्पृथिव्यंतानि
चतुर्विंशतिरूस्थतत्वानि अं १५ ऐं कः ४ आत्मतत्वेन स्थूलदेहं परिशो
धयामि नमः स्वाहा।इदं पवित्रममृतं पिबामि भवभेषजं।पशुपाश
समुच्छेदकारणं भैरवोदितं।इति प्रथमं।३ मायाकलाविद्यारागका
लनियतिपुरुषां तानि सप्तशुद्धतत्वानि कं २४ क्लीं ह ५ विद्यातत्वे
न सूक्ष्मदेहं परिशोधयामि नमः स्वाहा चित्तस्वातंत्र्यसारत्वात्त
स्यानंदमयत्वतः।तन्मयत्वाच्च भावानां भावश्चांतर्हितो रसैः।इति द्वि
तीयं।३ परमशिवशक्तिसदाशिवेश्वरशुद्धविद्यां तानि पंचतत्वा
नि यं ९ सौः स ३ शिवतत्वेन कारणदेहं विशोधयामि नमः स्वाहा।

स्वस्वातंत्र्यविकाशयस्वरसोयेनपीयते। तस्मादिमांसुधांदेवींपूर्णाहं
तांजुहोम्यहं। इतितृतीयं। ३ परमशिवसदाशिवेश्वरशुद्धविद्यामाया
कलाविद्यारागकालनियतिपुरुषप्रकृतिमनोबुध्यहंकारश्रोत्रत्व
क्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्दस्पर्शरूपरसगं
धाकाशवाय्वग्न्यप्पृथिव्यंतानिषट्त्रिंशत्तत्वानिअं ५० ऐंक्लींसौः
क १६ सर्वतत्वेनजीवात्मपरमात्मनोरैक्यंविशोधयामिनमःस्वाहा।
प्रकाशामर्शहस्ताभ्यामवलंब्योन्मनीस्रुचं। धर्माधर्मकलास्नेह
पूर्णामग्नौजुहोम्यहं। इतिचतुर्थं। अधिकारीचेत्पंचमंपात्रंस्वीकु
र्यात्। ततःसामायिकैःसहचर्वणादिकृत्यचक्राद्बहिःहस्तौप्रक्षाल्य
श्रीगुरुत्रयवंदनादिवक्ष्यमाणप्रकारेणमूलमष्टोत्तरंजप्त्वादेवीवा
महस्तेसमर्प्यश्रीचक्रेपुष्पांजलीन्दद्यात्तद्यथा। ३ मूलं। समस्तमु
नियक्षकिंपुरुषसिद्धविद्याधरग्रहासुरसुराप्सरोगणमुखै

र्गणैःसेविते। निवृत्तितिलकांबरप्रकृतिशांतिविद्याकलाकलापमधुरा
कृतेकलितएषपुष्पांजलिः॥१॥ त्रिवेदकृतविग्रहेत्रिविधकृत्यसंधायि
नित्रिरूपसमवायिनित्रिपुरमार्गसंचारिणि। त्रिलोचनकुटुंबिनित्रिगु
णसंविदुद्यत्पदेत्रयित्रिपुरसुंदरित्रिजगदीशिपुष्पांजलिः॥२॥ पुरंदरज
लाधिपांतककुबेररक्षोहरप्रभंजनधनंजयप्रभृतिवंदनानंदिते। प्र
वालपदपीठिकानिकटनित्यवृत्तिस्वभूर्विरिंचिवनितास्तुतेविहितए
षपुष्पांजलिः॥३॥ यदाननतिबलादहंकृतिरुदेतिविद्यावयस्तपोद्र
विणरूपसौरभकवित्वसंविन्मयी। जरामरणजन्मजंभयमुपैति
तस्यांसदासमाहितसमीहितप्रसवभूर्नितुभ्यंनमः॥४॥ निरावरण
संविदुन्मिषदुपाधिभेदप्रदंपदास्पदचिदंकृतावरशरीरिणिस्वैरि
णि॥ रसायणतरंगिणीरुचितरंगसंचारिणिप्रकामपरिपूरिणिप्र
सृतएषपुष्पांजलिः॥५॥ तरंगयतिसंपदंतदनुसंहरत्यापदंसु

रवं वितरयति श्रियः परिचिनोति हंति द्विषः ॥ क्षिणोति दुरितानि
य प्रणतिरंब तस्यै स दाशिवंकरि शिवपरे शिवपुरंध्रि तुभ्यं नमः ॥६॥
शिवे शिवसकृशीतलामततरंगगंथोल्लसन्नवावरणदेवतेनवन
वामृतस्यंदिनि ॥ गुरुक्रमपुरस्कृते गुणशरीरनित्योज्वले षडंग
परिवारिते कलितएष पुष्पांजलिः ॥७॥ त्वमेव जननी पिता त्व
मसि बांधवस्त्वं सखा त्वमायुरसि त्वमाभरणमासनस्त्वं कलग ॥ त्वं
त्वमेव वपुषः स्थितिस्त्वमखिला शक्तिस्त्वं गुरुः प्रसीद परमेश्व
रि प्रणतपात्रि तुभ्यं नमः ॥८॥ अथ गुरुपुष्पांजलिः ॥ करुणाश
क्तिकल्लोलकरुणाकलितासने ॥ वरानुग्रहरूपाय गुरवे कुसु
मांजलिः ॥९॥ गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ॥ गुरुरेव
परंब्रह्म तस्मै श्रीगुरवे नमः ॥१०॥ अनुत्तरमहासंविदनुभूतिकला ॥१०॥
सने ॥ गुरुगंधगुणाढ्याय गुरवे कुसुमांजलिः ॥३॥ अज्ञानतिमिरांधस्य
ज्ञानांजनशलाकया ॥ चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥४॥ निजस्फू
र्तिनमस्कारनिरस्तदुरहंकृते ॥ विद्यागमरहस्याय गुरवे कुसुमांजलिः ॥५
अंतस्तिमिरनिर्भेदभानवे कामधेनवे ॥ विकल्पजननीकल्पतरवे गुरवे न
मः ॥६॥ धर्माधर्ममयो विधिस्तदितरं कर्मद्विधा तत्सुखं पुण्यं पापमशर्म श
र्म च फलं यत्र स्फुरंति स्फुटं ॥ येनायं खलु जीवभाजनमहो मायातरुः पातित
स्तस्मै दिव्यवपुर्धराय गुरवे नाथाय पुष्पांजलिः ॥७॥ छित्वा कर्मनिबद्धस
न्निरवधि पुष्टान्विकल्पावलिकान्कारागारमनेकसंशयरिपून्हत्वा मृगान्सेव
कः ॥ प्रक्षाल्य प्रचुरं मलत्रयमहो संस्थापितः स्वे पदे येन श्रीगुरुरूपिणे भग
वते तस्मै नमः शंभवे ॥८॥ इति पुष्पांजलीन्दत्वा ॥ स्तोत्रं पठेत् ॥ ॐ गणेशग्र
हनक्षत्रयोगिनीराशिरूपिणीं ॥ देवीं मंत्रमयीं नौमि मातृकापीठ
रूपिणीं ॥१॥ प्रणमामि महादेवीं मातृकां परमेश्वरीं ॥ कालहल्लोह
लोल्लोलकलनाशमकारिणीं ॥२॥ यदक्षरैकमात्रेऽपि संसिद्धे स्पर्ध
कल
तेनरः ॥ रविताक्ष्येंदुकंदर्पशंकरानलविष्णुभिः ॥३॥ यदक्षरश

शिज्योत्स्नामंडितंभुवनत्रयं। वंदेसर्वेश्वरींदेवींमहाश्रीसिध्धमातृ
कां॥४॥यदक्षरमहासूत्रप्रोतमेतज्जगत्त्रयं। ब्रह्मांडादिकटाहांतं
तांवंदेसिध्धमातृकां॥५॥यदेकादशमाधारंबीजंकोणत्रयोद्भवं।
ब्रह्मांडादिकटाहांतंजगदद्यापिदृश्यते॥६॥अकचादिटतोन्न
ध्धपयशाक्षरवर्गिणीं॥ज्येष्ठांगबाहुहृत्पृष्ठकटिपादनिवासिनीं॥७॥
तामीकाराक्षरोध्धारांसारात्सारांपरात्परां।प्रणमामिमहादेवीं
परमानंदरूपिणीं॥८॥अद्यापियस्याजानंतिनमनागपिदेवताः
केयंकस्मात्क्वकेनेतिस्वरूपारूपभावनां॥९॥वंदेतामहमक्ष
य्यक्षकाराक्षररूपिणीं।देवींकुलकुलोल्लासप्रोल्लसंतींपरां
शिवां॥१०॥वर्गानुक्रमयोगेनयस्यांमात्रष्टकंस्थितं।वंदेताम
ष्टवर्गोत्थमहासिध्ध्यष्टकेश्वरीं॥११॥कामपूर्णजकाराख्यश्री
पीठांतर्निवासिनीं।चतुराज्ञाकोशभूतांनौमिश्रीत्रिपुरामहं॥१२॥
इतिद्वादशभिःश्लोकैःस्तवनंसर्वसिध्धिकृत्।देव्यास्त्वखंडरूपा

यास्तवनंतवतद्यतः।इतिघंटावादनपुरःसरंस्तुत्वाप्रार्थनामुद्रांब
ध्वाप्रार्थयेत्।किंकिंदुःखंदनुजदलिनिक्षीयतेनस्मृतायां।काका
सिध्धिःस्फुरतिनतुतेप्राप्यतेनार्चितायां॥काकाकीर्तिःकुल कम
लिनिख्यायतेनस्तुतायांकंकंयोगंत्वयिनलभतेचित्तमालंबिता
यां॥१॥सर्गसंसर्गसंरंभस्फुरिताघौघविभ्रमे।चित्त्वंद्रमंडलांतस्थे
नमस्तेहरवल्लभे॥२॥जगदाल्हादनोद्योगयोगभोगवियोगिनि।स्थि
तिभावस्थितेगौरिनमःस्थाणुप्रियेंबिके।भावाभावपृथग्भाव
स्वभावोदयधर्मिणि।चैतन्यपंचकेदेविनमस्तुभ्यंवरानने॥४॥स्र
ष्टिस्थितिरुपसंहारवृत्तिस्थितपरोदये।चिद्विश्रांतिमहासत्तामात्रे
मात्रेनमोस्तुते॥५॥वन्ह्यर्कशीतकिरणब्रह्मचक्रांतरोदिते।चतुः
पीठेश्वरिशिवेनमस्त्रिपुरसुंदरि॥६॥चराचरमिदंविश्वंप्रकाश
यतितेजसा।मातृकारूपमास्थायतस्यामात्रेनमोस्तुते॥७॥स्तु
ताभवभयध्वंसिपूजितासिवशंकरि।स्तुतास्त्वंवांछितंवस्तुदद्या

सिकरुणाकरे॥८॥भक्तस्य मे नित्यपूजायुक्तस्य मम संततेः।वाग्र
मादिमहासिद्धिं देहि त्रिपुरसुंदरी॥९॥परमानंदसंदोहसंमोद
भरनिर्भरे॥दुःखत्रयपरिम्लानवदनं पाहि मां शिवे॥१०॥शाह
ब्रह्ममये स्वच्छे देवि त्रिपुरसुंदरि।यथाशक्ति जपं पूजां गृहाणत्व
मनुग्रहात्॥११॥अज्ञानादल्पबुद्धित्वादालस्याद्दुःखसंभवात्॥
कृतापराधं कृपणं क्षंतुमर्हसि मां शिवे॥१२॥अज्ञानामसमर्थाना
मर्थानभिनिवेशिनां।अंबत्वद्भक्तमस्माकं शिशूनां हरवल्लभे॥१३॥
कृपामयमपांगं भो सकृन्मयि निपातय।तावदहं कृतार्थोस्मि न न्ते
किंचिन्न हीयते॥१४॥द्रव्यहीनं क्रियाहीनं मंत्रहीनं मया कृतं।त
त्सर्वं कृपया देवि क्षमस्व परमेश्वरि॥१५॥यन्मया क्रियते कर्म जाग्र
त्स्वप्नसुषुप्तिषु।तत्सर्वं तावकी पूजा भूयाद्भूत्यै नमोस्तु ते॥१६॥
यन्मयोक्तं महाशानात्तन्मह त्वत्क्षममेव वा॥हंत सर्वं जगस्थात्रि ११०२॥

क्षंतव्यमहमंजलिः॥१७॥जातो ह्वैन महामोहशर्वरीक्षपणक्षमः॥
भास्वानिव जयत्यर्को गणेशः शक्तिसंयुतः॥१८॥प्रतिभासागरो
ल्लासो निशाकर इवापरः॥मूर्त्तियुक्तः स जयति बटुकस्तांडवान्वि
तः॥१९॥षट्त्रिंशत्तत्त्वभरितं क्षेत्रं यः पालयेत्परं।क्षेत्रेशं तमहं
नौमि वारुणस्थं महाबलं॥२०॥चतुःपीठनिवासिन्यो योगीश्व
र्यो महाबलाः॥चतुःषष्टिप्रकारास्ता नित्यं वंदे कुलांगनाः॥२१॥
भेदाभेदमहामोहविवर्त्तपरिमंडितं॥आपूरयंती समयां द्वा
त्रिंशार्णां नमाम्यहं॥२२॥इति देवीं क्षमापयेत्।पुनः नमस्तेना
थ भगवन्नित्यादि पंचश्लोकैः श्रीगुरुं प्रार्थयेत्।ततः मूलेन पु
ष्पांजलिं दत्वा।सर्वशक्तिक्रमोद्भूतां प्रभोन्मोहमिहासिकां।देव
स्यदेवतां कांचित्संविन्मूखमयीं श्रये।इति प्रदक्षिणामेकां कृत्वा

ॐ सर्वमंगलमांगल्ये शिवे सर्वार्थसाधिके। शरण्ये त्र्यंबके गौरि नाराणि नमोऽस्तु ते। इति सप्तधा जप पंचनमस्कारान्कृत्वासने स्थित्वा पुष्पांजलिं दत्वा। पुनः प्रार्थयेत्। यद्दत्तं भक्तिमात्रेण पत्रं पुष्पं फलं जलं। निवेदितं च नैवेद्यं तद्गृहाणानुकंपया। आवाहनं न जानामि न जानामि विसर्जनं। पूजाभागं न जानामि त्वं गतिः परमेश्वरि। नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहं। तेषु तेष्वच्युता भक्तिरच्युतास्यां सदा त्वयि। कर्मणा मनसा वाचा त्वत्तो नान्या गतिर्मम। अंतश्चरसि भूतानां दृष्टिस्त्वं परमेश्वरि। देवी धात्री च भोक्त्री च देवी सर्वमिदं जगत्। देवी जयति सर्वत्र या देवी सोहमेव च। यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत्। क्षंतुमर्हसि देवेशि कस्य न स्खलितं मनः। मंत्रेषु पठितेष्वेषु स्वयमेव प्रसीदति। दानुदेवी चतुर्वर्गम

चिराद्देवि भैरवि। आपदि किं करणीयं स्मरणीयं चरणयुगलमंबायां। तत्स्मरणं किं कुरुते ब्रह्मादीनपि किंकरान्कुरुते। पातय वा पाताले स्थापय वा सकललोकसाम्राज्ये। मातस्तव पदयुगलं नाहं मुंचामि नैव मुंचामि। अपराधसहस्राणि क्रियंतेऽहर्निशं मया। दासोहमिति मां मत्वा क्षमस्व परमेश्वरि। भूमौ स्खलितपादानां भूमिरेवावलंबनं। त्वयि जातापराधानां त्वमेव शरणं शिवे। अपराधो भवत्येव सेवकस्य पदे पदे। कोपरा सहतां लोके केवलं स्वामिनीं विना। इति प्रार्थ्य। पुनः पात्राणि वीरशक्तिभ्यो भोगपात्राम्रतेन दद्यात्तेषां संतोषं कृत्वा क्षमाप्य॥

1322

॥९४॥